# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

कक्षा – **शास्त्री-०२ सेमेस्टर-०३** | **प्रश्नपत्रम्- ०७** | गुणाः - ७०

विषयः– नव्यव्याकरणम् | कोड – CE-2.3.5 | समयः – ०३:०० तः ०६:००

दिनाङ्कः – ०१/१२/२०१६ | ग्रन्थः – परिभाषेन्दुशेखरः महाभाष्यं च

---

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ निम्नलिखितासु परिभाषाद्वयं वाख्ययम्** **08**

**(क)** यथोदेशं संज्ञापरिभाषम्।

**(ख)** कार्यकालं संज्ञापरिभाषम्।

**(ग)** निर्दिश्यमानस्यादेशा भवन्ति।

**प्रश्नः २ निम्नलिखितयोः परिभाषयोः एका परिभाषा व्याख्येया** **08**

**(क)** कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते।

**(ख)** अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्।

**प्रश्नः ३ निम्नलिखितेषु द्वयोः टिप्पणी लेख्या।** **04**

**(क)** परिभाषेन्दुशेखरस्य मङ्गलाचरणम्

**(ख)** पूर्वेणैवाण्ग्रहाः सर्वे

**(ग)** 'स्थानिवत्' सूत्रेण यदागमपरिभाषाया गतार्थत्वशङ्का, तन्निराकरणं च

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेषु पञ्चानां प्रश्नानां लघूतरं लेख्यम्** **05**

**(क)** परिभाषेन्दुशेखरस्य रचयिता कः?

**(ख)** शास्त्रत्वसम्पादकप्रकरणे कति परिभाषाः ?

**(ग)** परिभाषेन्दुशेखरे कति प्रकरणानि सन्ति ?

**(घ)** नागेशकृतं मङ्गचरणं लिखन्तु?

**(ङ)** व्याकरणशास्त्रे कतिविधाः परिभाषाः समुपलभ्यन्ते?

**(च)** संज्ञापरिभाषाविषये कति पक्षाः सन्ति ?

**(छ)** किं नाम यथोद्देशम् ?

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ५ निम्नलिखितासु परिभाषाद्वयं व्याख्येयम्** **08**

**(क)** वर्णाश्रये नास्ति प्रत्ययलक्षणम्।

**(ख)** प्रत्ययग्रहणे चापञ्चम्याः।

**(ग)** स्त्री-प्रत्यये चानुपसर्जने न।

**प्रश्नः ६ निम्नलिखितयोः एका परिभाषा सावतरणं व्याख्येया** **08**

**(क)** उणादयोऽव्युत्पन्मानि प्रतिपदिकानि।

**(ख)** प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम्।

**प्रश्नः ७ निम्नलिखितेषु द्वयोः टिप्पणी कार्या** 04

(क) उत्तरपदाधिकारः

(ख) कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इत्यत्र 'ग्रहण'स्याभिप्रायः।

**प्रश्नः ८ निम्नलिखितेषु प्रश्नेषु पञ्चानां लघूतरंलेख्यम्** **05**

(क) कानि चतुर्विधानि आन्तर्याणि भवन्ति?

(ख) स्त्री प्रत्यये......इति परिभाषा ज्ञापकसिद्धा वा वाचनिकी वा?

(ग) 'व्यपदेशिवदेकस्मिन्' इति परिभाषायां किंनाम व्यपदेशित्वम्?

(घ) आन्तर्यमनेकविधं भवति इत्यत्र किं गमकम्?

(ङ) चतुर्विधेषु आन्तर्येषु कीदृशम् आन्तर्य बलीयः?

(च) उणादयोऽव्युत्पनानि प्रतिपदिकानि इत्यत्र किं ज्ञापकम्?

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ९ निम्नलिखितेषु प्रश्नद्वयं समाधेयम्** **08**

(क) शब्दापशब्दयोरेकतरस्योपदेशः कर्तव्यः उभयोः वा इति स्पष्टं व्याख्येयम्।

(ख) अस्त्यप्रयुक्तः इति वार्तिकं सोपपत्तोक्तं व्याख्येयम्।

(ग) रक्षार्थं वेदानामध्येयं व्याकरणम्इत्येतां भाष्यपङ्क्तिं विवेचयत।

**प्रश्नः १० निम्नलिखितयोः एकस्य व्याख्या कार्या** **08**

(क) दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपरधात्।

(ख) अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्।

**प्रश्नः ११ निम्नलिखितयोः विषयमेकमाश्रित्य टिप्पणी कार्या** **02**

(क) सिद्धे शब्दार्थ सम्बन्धे

(ख) यथा लौकिक वैदिकेषु

**प्रश्नः १२ निम्नलिखितेषु प्रश्नद्वयस्य उत्तरं लेख्यम्** **02**

(क) कस्य रक्षार्थम् अध्येयं व्याकरणम्?

(ख) किं नाम आह्निकम्?

(ग) व्याकरणमहाभाष्यस्य रचयिता कः?

(घ) महाभाष्ये कति आह्निकानि सन्ति?

***